International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(3): 131-135
© 2018 IJSR
www.anantaajournal.com
Received: 23-03-2018
Accepted: 24-04-2018

**विनयः एच्. वि.**
शोधछात्रः, राजीव गान्धि परिसरः, शृङ्गेरि, कर्णाटकम्

**Correspondence**
**विनयः एच्. वि.**
शोधछात्रः, राजीव गान्धि परिसरः, शृङ्गेरि, कर्णाटकम्

# काव्यस्य नवरसरुचिरत्वविषये प्रदीप-खण्डनकारयोर्मतभेदः

**विनयः एच्. वि.**

**प्रस्तावना**

साहित्यशास्त्रे प्रमाणभूतस्य काव्यप्रकाशस्यादौ ब्रह्मसृष्टि-कविसृष्ट्योः वैलक्षण्यं प्रतिपादयता अलङ्कारमूर्धन्येन मम्मटाचार्येण, ब्रह्मसृष्टिः षड्रसा, न तु हृद्यैव तैः, किन्तु कविभारती नवरसरुचिरेति स्पष्टमभिहितम् । नवसङ्ख्याका रसा नवरसाः, तैः रुचिरा= मनोहरा नवरसैः शृङ्गार-हास्य-करुण-अद्भुत-वीर-रौद्र-बीभत्स-भयानक-शान्तरसैः रमणीया इति तदभिप्रायः । अत्र साहित्यशास्त्रे विवादग्रस्तौ द्वौ विचारौ वर्तेते-

१. रससङ्ख्या का ?
२. सर्वे रसाः सुखदायका उत न ?

इत्येतौ । शान्तस्य रसत्वानङ्गीकर्तारः अष्टौ एव रसा इति, भक्तिवात्सल्यादीनां रसत्वाङ्गीकर्तारः नवाधिका रसा इति चाभिप्रयन्ति । रसेषु करुण-भयानकादिरसानां सुखमयत्वानङ्गीकर्तारः काव्यस्य नवरसरुचिरत्वं नाङ्गीकुर्वन्ति । केचन रसा सुखदायकाः केचन च दुःखदायका एवेति तदभिप्रायः । एतौ द्वावपि प्रश्नौ मम्मटाचार्येण समाधत्तौ- 'नवरसरुचिराम्' इत्यनेन कविभारतीविशेषणेन ।

काव्यप्रकाशस्य व्याख्याकारेषु परिगणनीयं स्थानं वर्तते गोविन्दठक्कुरस्य, येन 'काव्यप्रदीप'नामकं व्याख्यानं विरचितं काव्यप्रकाशस्य । अपि चास्य व्याख्यानस्य अनेकैः विद्वद्भिः व्याख्यानं विरचितमस्ति । सः काव्यस्य नवरसरुचिरत्वरूपं मम्मटाचार्यस्य सिद्धान्तम् अङ्गीकरोति ।

काव्यप्रकाशस्य अपरः व्याख्याकारः सिद्धिचन्द्रगणिः, यः 'काव्यप्रकाशखण्डन'नामकं व्याख्यानं रचितवान् । अनेन मम्मटाचार्यस्य बहवः सिद्धान्ताः खण्डिताः । तेषु काव्यस्य नवरसरुचिरत्वविषयोऽप्यन्यतमः । एषः रसानां नवत्वमपि नाङ्गीकरोति, सर्वेषामपि रसानां सुखदायकत्वमपि न । अपि च केषाञ्चन रसानाम् अभेदं मन्यते सः । करुण-बीभत्स-भयानां रसत्वं नास्ति । वीर-रौद्रयोः भेदो नास्ति । वात्सल्यमपि न रसः इति वदति खण्डनकारः । एतद्विषये तस्य अभिप्रायः चतुर्थोल्लासे रसनिरूपणावसरे स्पष्टं निरूपितमस्ति । तस्याभिप्राये-

इष्टनाशादिभिर्जायमानं चेतोवैक्लव्यमेव शोकः । रौद्रशक्त्या जनितं वैक्ल्व्यं मनसः भयम् । दोषादिकं दृष्ट्वा या गर्हा जायते सैव जुगुप्सा । तत्वज्ञानात् य लौकिकसुखा-भिलाषादीनां निवृत्तिर्भवति स एव निर्वेदः, स्वस्यैव अपमानननादिकरणे पर्यवस्यति । ।

एवंरीत्या यदि पर्यालोचयामस्तर्हि शोक-भय-जुगुप्सा-निर्वेदादीनां रसरूपेण परिणतिर्न भवतीति करुण-भयानक-बीभत्स-शान्तादीनां रसत्वं न सम्भवति ।

ये तेषां रसत्वमङ्गीकुर्वन्ति ते एवं वदेयुः यत् 'तेषां तथाभूतत्वेऽपि अभिव्यक्तानन्दचिदात्मना सहाभिव्यक्तानां रसत्व'मिति । तदपि न युक्तम् । यतः स्थायांशे रसत्वविरोधात् । अर्थात् स्थाय्यवस्थायां तस्य रसत्वं न भवति, विभावानुभावव्यभिचारिसंयोगादेव स्थायिनां रसरूपेण परिणामात् शोकादिस्थायिनां तदभावान्न रसरूपेण परिणतिरिति रसत्वस्य असम्भवः । तेषां रसत्वाङ्गीकर्तार एवमपि वदेयुः यत् 'लोके एतेषां अलौकिकविभावादिसंयोगाभावात् नास्वाद्यता । किन्तु काव्ये अलौकिकविभावादिभिः खलु शोकादयोऽभिव्यज्यन्ते तदा तेषां रसत्वमङ्गीकर्तुमुचितम्, सुरते दन्ताद्याघातस्यास्वाद्यवदि'ति । तदपि न समीचीनम् । यतः एवं यद्यङ्गीक्रियते तर्हि क्षुधापिपासादिनानाविधदुःखहेतुजनितचेतोवैक्लव्यस्यापि रसान्तरत्वापत्तेः । सुरते दन्ताघातस्य बलवत्कामसम्भवदुःखनाशकत्वेन भारापगमानन्तरं 'सुखिनः संवृत्ता स्म' इतिवत् उपादेयत्वम् । तथा चेत् शोकादयोऽपि रत्यादिवत् स्वप्रकाशज्ञानसुखात्मका इति यद्युच्यते तर्हि तत्तु उन्मत्तप्रलपितमित्येव वक्तव्यं भवति । किञ्च सामाजिकेषु मृतकलत्रपुत्रादीनां विभावादीनां शोकादिस्थायिभावस्य चर्वणीयेन अजमहीपालादिना सह साधारण्यम्, अस्रुपातादिदर्शनात् । वर्णनीयतन्मयभवनं चापेक्षितमिति चेत्, कथं ब्रह्मानन्दसहोदररसोद्बोधः ? कथं वा नामाङ्गल्यम् ? अत एव केचिदजविलापादिकं न पठन्ति । बीभत्से तु मांसपूयाद्युपस्थित्या वान्तनिष्ठीवनादिकं यन्न भवेत् तदेवाश्चर्यम्, कुतस्तादृशपरमानन्दरूपरसोद्बोध इति । एवं भयेऽपि । तथा शान्तस्य त्यक्तसर्ववासनेषु भवतु नाम कथञ्चिद् रसत्वम्, विषयिषु पुनः सर्वविषयोपरमोपस्थित्या कथं रसत्वम् ? अत एवोच्यते-

> न यत्र दुःखं न सुखं न चिन्ता नद्वेषरागौ न च कांचिदिच्छा।
> रसः प्रशान्तः कथितो मुनीन्द्रैः सर्वेषु भाचेषु शमप्रधमनः॥

एवं वीर-रौद्रयोर्न भेदः, विभावादिसाम्यात् । न च स्थायिभेद एव भेदकः, तस्यापि नियामक-मुखप्रेक्षितत्वात् । यत्तु –'रक्ताऽस्य नेत्रता रौद्रे युद्धवीरात्तु भेदिनी।' इत्याहुः, तदपि न साधु । क्रोधसञ्चारिणि वीरे तस्याः सुलभत्वेन भेदकत्वानुपपत्तेः । न च रौद्रे अविवेकत्वस्य वीराद् भेदकस्य सम्भवाद् भेद इति वाच्यम् । क्रोधसञ्चारिणि वीरेऽप्यविवेकत्वस्य सम्भवात् । दानवीरादीनां प्रभावातिशयवर्णन एव कवीनां तात्पर्यमिति न तेषां रसत्वम् । एवं वात्सल्यनामाऽपि न रसः । भावेनैव गतार्थत्वात् ।

ननु कथम् अजविलापादिकं कविभिर्वर्ण्यत इति चेत्, उच्यते- तेषां अज-महीपतिप्रभृतीनां स्वस्वप्रियानुरागप्रकर्षप्रतिपत्त्यर्थम्। अत एव च अजमहीपतेः स्वप्रियां इन्दुमतीं प्रति देहत्यागः कालिदासेन वर्णितः । एवं शान्तस्यापि वर्णनं मुमुक्षूणां वैराग्यातिशयप्रतिपत्तये । एवं भयातिशयवर्णनं तत्तद्व्यक्तीनां मार्दवप्रतिपादनाय । वस्तुतस्तु कविभिः स्वशक्तिप्रदर्शनार्थमेव पद्मबन्धाबन्धादिनिर्माणवत् तत्र तत्र प्रवर्त्यते ।

एवं चतुर्थोल्लासे स्वकीयं रसविषयकमभिप्रायं प्रतिपादितवतः खण्डनकारस्य मते रसस्य नवसङ्ख्याकत्वं नास्ति । न केवलं खण्डनकार एव किन्तु रससङ्ख्याविषये तस्य सुखजनकत्वविषये च विवदन्ति बहव आलङ्कारिकाः। रसा अष्टौ उत नव उत दश इत्यत्र नास्त्यैकमत्यमालङ्कारिकेषु । तत्र शान्त-भक्ति-वात्सल्यरसाः रसस्य नवसङ्ख्याबाधकाः । तत्र भक्तेः रसत्वप्रतिपादकाः हेमचन्द्रादयो वर्तन्ते । वात्सल्यस्य रसत्वप्रतिपादकाः विश्वनाथः भोजकविरित्यादयः । तथैव सर्वे रसाः सहृदयानां कृते समानरूपेणानन्दं ददतीति केचन, शृङ्गार-हास्य-अद्भुत-वीर-शान्तरसानामानन्ददायकत्वम्, करुण-रौद्र-भयानक-बीभत्सानां आनन्ददायकत्वाभाव इति पक्षद्वयमपि साहित्यशास्त्रे वर्तते । तदिदानीं किञ्चिदवलोकयामः ।

प्रथमतया रससङ्ख्याविचारः । भक्तिरसस्तु भावान्तर्गततया स्पष्टतयैव साहित्य-शास्त्रकारैः सकारणमेव निराकृतः । तथैव वात्सल्यमपि । किन्तु शान्तरसस्य असद्भावापेक्षया सद्भाव एव बाहुल्येनाङ्गीकृतो वर्तते । अर्थात् शान्तरसस्याङ्गीकर्तॄणां पक्ष एव प्रबलः । वस्तुतः भरतनाट्यशास्त्रे शान्तरसं विहाय रसानामष्टत्वमेव व्यवस्थापितम् । किन्तु नाट्यशास्त्रव्याख्यात्रा उद्भटेन शान्तस्यापि रसत्वं सम्भाव्य '--शान्ताश्च नव नाट्ये रसाः स्मृताः' इति परिवर्तितेति डा. वि. राघवन् महोदया अभिप्रयन्ति [1] । मम्मटाचार्योऽपि 'अष्टौ नाट्ये रसाः स्मृताः' इत्युक्त्वा तदनन्तरं 'निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः' इति प्रतिपादितवान् [2] । 'मुनिवचनमत्र प्रमाणम्' इत्युक्त्वा अमुमेव नवरसवादं पण्डितराजः प्रामाणिकतया अभ्युपागच्छत् -

> शृङ्गारः करुणः शान्तो रौद्रो वीरोऽद्भुतस्तथा ।
> हास्यो भयानकश्चैव बीभत्सश्चेति ते नव ॥ [3]

इति । न केवलं काव्ये किन्तु नाट्येष्वपि शान्तरसमङ्गीकृत्य सयुक्तिकं व्यवस्थापितवान् । तत्र तेन शान्तरससाधकप्रमाणानि नैकानि दत्तानि।

शान्त इव भक्तिरपि रसत्वेनाङ्गीकर्तुं शक्यते खलु ? स च रसो भगवदालम्बनः, रोमाञ्चाश्रुपातादिभिरनुभावितः, हर्षादिभिर्व्यभिचारिभिः परिपोषितः, भागवतादिपुराणश्रवण-समये भगवद्भक्तैरनुभूयमानः दुरपह्नव एव । भक्तिरसस्थायिनोऽनुरागस्य शान्तरस-स्थायिवैराग्यविरुद्धत्वात् शान्तरसे नान्तर्भवति भक्तिः । अतः भगवदनुरागरूपा भक्तिरपि पृथक् रसत्वेन स्वीक्रियताम् इति केचनाभिप्रयन्ति । किन्तु साहित्यिकैः भक्तिर्न रसत्वेनाङ्गीकृता, किन्तु भावत्वेनैव । तत्र कारणमेवं निरूपितं जगन्नाथेन-'भक्तेर्देवादिविषयरतित्वेन भावान्तर्गततया रसत्वानुपपत्तेः' इति । अपि च प्राचीनानां सहमतिरपि तेन दर्शिता-

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ।
भावः प्रोक्तः----------------------------- ॥ 4

इति । एवं भक्तेः देवादिविषयकरतिरूपायाः काव्यप्रकाशकारादिप्राचीनालङ्कारिकसिद्धान्ता-नुमतत्वेन भावत्वमेव, न तु रसत्वम्, अतोऽतिरिक्तस्य दशमस्य भक्तिरसस्य न सम्भवः ।

तत्र सन्देहः-यथा कामिनीविषयकरतौ रतित्वमस्ति, तथैव देवादिविषयकरतावपि रतित्वमस्ति । तयोः एकस्याः स्थायित्वेऽपरायाश्च भावत्वे किं बीजम् ? विनिगमकञ्च किम् ? इति । सन्देहोऽयं जगन्नाथेन एवं समाधत्तः – "भरतादिमुनिवचनानामेवात्र रसभावादि-व्यवस्थापकत्वेन स्वातन्त्र्ययोगात् । अन्यथा पुत्रादिविषयाया अपि रतेः स्थायिभावत्वं कुतो न स्यात् ? न स्याद्वा कुतः शुद्धभावत्वम् जुगुप्साशोकादीनाम् ? इत्यखिलदर्शनवैयाकुली स्यात् । रसानां नवत्वगणना च मुनिवचननियन्त्रिता भज्येत, इति यथाशास्त्रमेव ज्यायः" इति ।

एवं शान्तस्य रसत्वाङ्गीकारेण भक्तेश्च रसत्वनिराकरणेन रसानां नवत्वं सिद्ध्यति । देवादिविषया रतिरित्यत्र आदिशब्देन राज-पुत्रादिविषयकरतिरपि गृह्यत इति विश्वनाथादिभिः प्रतिपादितवात्सल्यरसोऽपि भाव एवान्तर्भवतीति रसानां नवत्वस्य न कोऽपि बाधः ।

द्वितीयोऽशः 'रुचिर'शब्दः । पूर्वोक्तरीत्या सर्वरसानामपि आनन्ददायकत्वविषये साहित्यशास्त्रे मतद्वयं दृश्यते । केचन सर्वेष्वपि रसेषु आनन्दानुभवमेवाङ्गीकुर्वन्ति । केचन केषाञ्चन रसानामानन्दमयत्वम्, केषाञ्चन च दुःखमयत्वं वदन्ति । तत्र मतद्वयस्यापि अभिप्रायम् एवं सङ्गृहीतुं शक्यते-

**शोकादेः दुःखजनकत्ववादिनः** रसः यद्यपि स्वतः सुखरूपो न, तथाप्यनिर्वचनीय-रत्यादिस्थायीभावस्वरूपस्य रसस्य प्रतीतेरनन्तरं यद्विलक्षणं सुखमुत्पद्यते, तस्मात्सुखात् रत्यादिरूपरसस्य भेदो न ज्ञायत इति रसः सुखरूपः कथ्यते-इत्यादिविवेचनद्वारा अनिर्वचनीयस्थायिभावात्मकरसप्रतीत्यनन्तरं या विलक्षणसुखोत्पत्तिः स्वीकृता, सा सर्वांशेनापि समीचीनेति वक्तुं न शक्यते । यतः वास्तविकी शकुन्तलारतिः वास्तविके दुष्यन्ते सुखं जनयतीति कल्पितशकुन्तलाविषयकरतिः कल्पितदुष्यन्तरूपसहृदयेऽपि सुखं जनयितुं शक्नोति । यतः रतिः स्वभावत एव मधुरः, सर्वप्राणिसमानश्चेति, सहृदयानां कृतेऽपि ते काव्यार्थभावनया परिपक्वरत्यादयः सुखरूपा इति वक्तुं न कोऽपि बाधः । किन्तु वास्तविकशोक-भय-क्रोधादयस्तु लोके दुःखजनकतयैव प्रसिद्धाः । ते यत्र कल्पिताः सन्तः रसत्वं प्राप्नुवन्ति, तत्र सहृदयेषु कथं सुखमुत्पद्यते? नैवोत्पद्यते । तर्हि रसस्य सुखरूपत्वं कथम् ? किन्त्वेतद्विपरीततया वास्तविक-नायके यथा दुःखमुत्पन्नमासीत्तथैव सहृदयेऽपि दुःखमेवोत्पद्यत इत्येव वक्तव्यम् ।

**सुखजनकत्ववादिनः** वास्तविक-दुःखादिभिः दुःखमुत्पद्यते, न तु कल्पितदुःखादिभिः । अतः वास्तविक-नायकादिषु (रामादिषु) येषु दुःखं सत्यमासीत् तेषु दुःखमेव भवेत्, किन्तु कल्पितशोकाद्यनुभववत्सु सहृदयेषु दुःखं नोत्पद्यते।

**दुःखजनकत्ववादिनः** तन्न समीचीनम् । कल्पितसर्परूपरज्ज्वा भीतिः जायत एव खलु ? भवन्मतानुसारं तन्न भवेत्, किन्तु भवत्येवेति लोकानुभवः । अपि च यदि भवद्भिः कल्पितशोकादिभिः दुःखोत्पत्तिर्नाङ्गीक्रियते, तर्हि सहृदयेषु कल्पितरत्या सुखोत्पत्तिरपि अङ्गीकर्तुं न शक्यते । किन्तु शृङ्गाररसस्थले तदङ्गीकृतमस्ति ।

**सुखजनकत्ववादिनः** (१) शृङ्गारप्रधानकाव्येभ्य इव करुणरसप्रधानकाव्येभ्योऽपि यदि केवलाह्लाद एव सहृदय-हृदयप्रमाणकः, अर्थात् शृङ्गारप्रधानशाकुन्तलाद्यभिनयदर्शनात् रसास्वादसमये सहृदयानां यथा लेशतोऽपि दुःखानुभवो न जायते, तथैव करुणरसप्रधान-उत्तररामचरिताद्यभिनयदर्शनादपि रसास्वादा-वसरे दुःखानुभवो न जायत इत्येव यदि

सहृदयहृदयप्रमाणसिद्धं भवति, तर्हि कार्यानुरोधेन कारणानि कल्प्यन्त इति सिद्धान्तानुसारं, लोकोत्तरव्यापारस्य (विलक्षण-भावनारूपदोषस्य) आह्लादप्रयोजकत्वं यथाऽङ्गीकृतं तथैव दुःखप्रतिबन्धकत्वमपि अङ्गीकरणीयम् । तेन शाकुन्तलादिषु आह्लादप्रयोजकत्वम्, उत्तररामचरितादिषु दुःख-प्रतिबन्धकत्वमिति वक्तुं शक्यते ।

(२) यदि आह्लाद इव दुःखमपि प्रमाणसिद्धम्, अर्थात् शाकुन्तलादिषु सुखानुभवः, उत्तररामचरितादिषु सुखेन सह दुःखमप्यनुभूयत इत्येव सहृदयहृदयानुभवस्तर्हि विलक्षण-भावनायाः दुःखप्रतिबन्धकत्वं न कल्पनीयम् । यतस्तत्र सुखस्य कारणात् सुखोत्पत्तिः, दुःखस्य कारणाद्दुःखोत्पत्तिरिति कारणभेदादेकत्र विरुद्धयोः सुखदुःखयोरुत्पत्तौ न कोऽपि बाधः ।

**दुःखजनकत्ववादिनः** "---सर्वथा तत्र यतनीयमि"ति मम्मटाचार्यैः काव्ये कवीनां सहृदयानाञ्च प्रवृत्तिरवश्यं भवेदित्युक्तम्। शृङ्गाररसप्रधानकाव्येषु तद्भवति सुखरूपत्वात्तेषाम्। किन्तु, यदि करुणादिरसप्रधानकाव्येभ्यः सुखमिव दुःखमपि जायते तर्हि तत्र काव्यं कर्तुं कवीनां, श्रोतुं च सहृदयानां प्रवृत्तिः कथं भवेत् ? यतो हि इष्टसाधनताज्ञानं प्रवृत्तिं प्रति कारणम्। इदं 'काव्यं मदिष्टसाधन'मित्याकारकमिष्टसाधनताज्ञानं तत्र नास्ति, प्रत्युत दुःखरूपानिष्ट-साधनत्वग्रहस्यैव सद्भावः, तत्र अनिष्टसाधनमिदमिति भावयता कविना सहृदयेन चावश्यमेव काव्यवैमुख्यमेव सञ्जायते ।

**सुखजनकत्ववादिनः** लोकेऽस्मिन् सर्वमपि आधिक्येन वा अल्पतया वा दुःखग्रस्तमेव । किन्तु यत्र दुःखस्याल्पत्वं सुखस्य चाधिक्यं तत्र प्रवृत्तिः, दुःखस्याधिक्ये सुखस्याल्पत्वे च निवृत्तिः लोके सर्वत्रापि दृश्यत एव । चन्दनेन लभ्यमानस्य सौरभशीतलतादिसुखाधिक्यस्याकाङ्क्षया तस्य घर्षणश्रमजन्यमल्पं दुःखं सहन्ते, चन्दनलेपने प्रवृत्तिं च विन्दन्ति, न तु घर्षणश्रमजन्यमल्पं दुःखं दूरीकर्तुं सौरभ्यादिमहत्सुखदायकात् चन्दनलेपनान्निवर्तन्ते । तथैव शोकादि-प्रधानकाव्येऽप्यानन्दांश एवाधिकः, दुःखांशस्त्वत्यल्प एव । अत जनानां प्रवृत्तिस्तत्र जायते । ये केवलमाह्लादमेवाङ्गीकुर्वन्ति तेषां मते तु प्रवृत्तिर्निर्बाधा।

**दुःखजनकत्ववादिनः** तत्र प्रथममते दुःखं नाङ्गीकृतं खलु ? तर्हि तत्र दुःखस्य कार्याणि अश्रुपातादीनि कथं भवन्ति?

**सुखजनकत्ववादिनः** अश्रुपातादयः केवलं दुःखादेव जायन्त इति नास्ति नियमः । 'अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसो मताः' इत्युक्तरीत्या आनन्दादपि जायन्त एवेति लोकानुभवः। भगवद्भक्ताः भगवद्वर्णन-श्रवणादिजन्यसुखादश्रूणि पातयन्ति। न तत्र दुःखस्य लेशोऽपि वर्तते ।

**दुःखजनकत्ववादिनः** यदि करुणरसादौ स्वात्मनि (सहृदये) दशरथाद्यारोपेण सुखं जायत इत्युच्यते, तर्हि सन्निपातादिरोगा-वस्थायामपि तादृशारोपात् सुखमेव स्यात्। किन्तु तदा दुःखमेव जायत इति त्वनुभवसिद्धमतः करुणादिरसादावपि दुःखमेवाङ्गीकरणीयम् ।

**सुखजनकत्ववादिनः** न तथा । सन्निपातादिरोगावस्थायां क्रियमाणे आरोपे आनन्ददायकस्य लोकोत्तरव्यापारस्य न किमपि पात्रं भवतीति तत्र दुःखमेव । किन्तु काव्ये तादृशारोपेऽलौकिकः व्यापार आनन्दं जनयतीति द्वयोरपि भिन्नैव स्थितिः । अयं हि लोकोत्तर-काव्यव्यापारस्य व्यञ्जनाख्यस्य महिमा। शोकादयः पदार्था अरमणीया अपि व्यञ्जनाप्रयोज्या आह्लादमलौकिकं जनयन्ति ।

यद्यपि काव्यमलौकिकं तथापि " त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते" [5] इति महाकविकालिदासोक्त्यनुसारं लोकवृत्तान्त एवात्र नानारसयुक्तो भवति । अतः काव्यविषयविमर्शे लोकवृत्तान्तोऽपि आधारत्वेन परिगणनीय एव । अस्मिन् विषयेऽपि तथैव । यतो हि सुखदुःखात्मकत्वं लोके सामान्यम् । लोके यथा धर्मपराः दुःखमपि सुखत्वेन परिगणयन्ति । भगवन्निष्ठमानसानां तेषां मनसि दुःखमपि भगवदनुग्रह एवेति धिया यथा दुःखं नानुभूयते, किञ्चिद्दुःखमपि भगवन्मुखत्वात् महत्सुखे विलीनं भवति, तथैव काव्येऽपि भावनामहिम्ना अलौकिकव्यापारसहकारेण करुणादिविषयेष्वप्या-नन्दानुभव एव जायते ।

केचन सामान्यजनाः किञ्चिद्दुःखमपि महदिव परिगणयन्ति। तेन सहैव वर्तमानं सुखं न पश्यन्ति । किन्तु अन्ते सुखमनुभवन्ति । तेषां कृते काव्ये भावनायाः प्राबल्येनापि न सम्पूर्णतया सुखमेव लभ्यते किन्तु दुःखवैचित्र्यानुविद्धरसास्वाद एव ।

अत एव भोजराजेन, "रसा हि सुखदुःखावस्थारूपाः"[6] " मनोऽनुकूलेषु दुःखादिष्वपि सुखानुभवाभिमानो रसः" [7] इति करुणादौ पृथक् पृथगनुभवो निरूपितः । विश्वनाथोऽपि-

किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ।
तथा रामायणादीनां भविता दुःखहेतुता ॥
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् ।

सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः ॥
तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते।"[8]

इत्युक्तवान्। तथैव,

हेतुत्वं शोकहर्षादिर्गतेभ्यो लोकसंश्रयात्।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः ॥
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः ॥[9]

इति आह्लादवादिनामुक्तिमपि स्पष्टीकृतवान्।
तदाधारेणैव जगन्नाथोऽपि करुणादावपि सुखानुभवं निरूपयति। एतत्तु लोकोत्तरकाव्यव्यापारस्यैव महिमा, येन अरमणीया शोकादयोऽपि पदार्थाः परिष्कृता भूत्वा अलौकिकानन्दं ददति । अत एवालौकिकानन्ददायकं लोकोत्तरवर्णनानिपुणकविकर्म किञ्चिद्विलक्षणमेव।
एवं रसस्यालौकिकतया सह तस्य सुख-दुःखरूपताप्रश्नोऽपि भारतीयसाहित्यकाराणां कृते विवेचनीयविषय एव । विषयेऽस्मिन् प्रायः मतत्रयं वक्तुं शक्यते-

(अ) अभिनवगुप्तमते शृङ्गारादिरसा आंशिकरूपेण सुखदुःखात्मकाः, शान्त एक एव रसः केवलं पूर्णतया सुखात्मकः।

(आ) नाट्यदर्पणकारयोः रामचन्द्र-गुणचन्द्रयोर्मतं विभज्यवादि । शृङ्गार-हास्य-वीर-अद्भुत-शान्तरसाः केवलसुखात्मकाः । बीभत्स-रौद्र-भयानक-करुणरसाः दुःखात्मका एव।

(इ) धनिक-धनञ्जय-मम्मटाचार्य-विश्वनाथादीनां मते सर्वे रसा आनन्दमया एव, न तत्र दुःखलेशोऽपि वर्तते।

एवं मम्मटाचार्येण कविसृष्टेः ब्रह्मसृष्टिविलक्षणत्वं यद्दर्शितं तत् प्रदीपकारेण सर्वात्मना सहमतम् । खण्डनकारेण तु ब्रह्मसृष्टि-कविसृष्ट्योः नास्ति विलक्षणता काचिदित्येवाभिप्रेतम् । सहृदयानां तु ब्रह्मसृष्टेः दुःखभूयस्त्वम्, कविसृष्टेः ब्रह्मानन्दसदृशानन्ददायकत्वं चानुभवसिद्धमिति, प्रदीपकारस्याभिप्रायोऽत्र यथार्थतामेति इति शम्।

**संदर्भाः**


1. "The number of Rasas."
2. काव्यप्रकाशः-चतुर्थोल्लासः- सू-४७
3. रसगङ्गाधरः प्रथमाननम्
4. काव्यप्रकाशः-चतुर्थोल्लासः-कारिका-३४
5. मालविकाग्निमित्रम्-प्रथमाङ्कः
6. शृङ्गारप्रकाशः.पृ-४३७
7. शृङ्गारप्रकाशः.पृ-४३०
8. साहित्यदर्पणम् -३परिच्छेदः
9. साहित्यदर्पणम्- परिच्छेदः-३